শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরেঃ কৃতিষু

# ॥ শ্রীমন্নারাযণীযে অষ্টষষ্টিতমং দশকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীমন্নারাযণীযে অষ্টষষ্টিতমং দশকম্ ॥

## গোপীনাং ভগৱৎসমাগমাদিৱর্ণনম্

তৱ ৱিলোকনাদ্গোপিকাজনাঃ
  প্রমদসঙ্কুলাঃ পঙ্কজেক্ষণ।
অমৃতধারযা সম্প্লুতা ইৱ
  স্তিমিততাং দধুস্ত্বৎপুরোগতাঃ ॥ **68.1** ॥

তদনু কাচন ৎৱৎকরাম্বুজং
  সপদি গৃহ্ণতী নির্ৱিশঙ্কিতম্।
ঘনপযোধরে সন্নিধায সা
  পুলকসংৱৃতা তস্থুষী চিরম্॥ **68.2** ॥

তৱ ৱিভোঽপরা কোমলং ভুজং
  নিজগলান্তরে পর্যৱেষ্টযৎ।
গলসমুদ্গতং প্রাণমারুতং
  প্রতিনিরুন্ধতীৱাতিহর্ষুলা ॥ **68.3** ॥

অপগতত্রপা কাপি কামিনী
  তৱ মুখাম্বুজাৎ পূগচর্ৱিতম্।
প্রতিগৃহয্য তদ্ৱক্ত্রপঙ্কজে
  নিদধতী গতা পূর্ণকামতাম্॥ **68.4** ॥

ৱিকরুণো ৱনে সংৱিহায মা -
  মপগতোঽসি কা ৎৱামিহ স্পৃশেৎ।

ইতি সরোষযা তাৱদেকযা
   সজললোচনং ৱীক্ষিতো ভৱান্॥ **68.5**॥

ইতি মুদাঽঽকুলৈর্ৱল্লৱীজনৈঃ
   সমমুপাগতো যামুনে তটে।
মৃদুকুচাম্বরৈঃ কল্পিতাসনে
   ঘুসৃণভাসুরে পর্যশোভথাঃ॥ **68.6**॥

কতিৱিধা কৃপা কেঽপি সর্ৱতো
   ধৃতদযোদযাঃ কেচিদাশ্রিতে।
কতিচিদীদৃশা মাদৃশেষ্ৱপী -
   ত্যভিহিতো ভৱান্ ৱল্লৱীজনৈঃ॥ **68.7**॥

অযি কুমারিকা নৈৱ শঙ্ক্যতাং
   কঠিনতা মযি প্রেমকাতরে।
মযি তু চেতসো ৱোঽনুৱৃত্তযে
   কৃতমিদং মযেত্যূচিৱান্ ভৱান্॥ **68.8**॥

অযি নিশম্যতাং জীৱৱল্লভাঃ
   প্রিযতমো জনো নেদৃশো মম।
তদিহ রম্যতাং রম্যযামিনী -
   ষ্ৱনুপরোধমিত্যালপো ৱিভো॥ **68.9**॥

ইতি গিরাধিকং মোদমেদুরৈ -
   র্ৱ্রজৱধূজনৈঃ সাকমারমন্।
কলিতকৌতুকো রাসখেলনে
   গুরুপুরীপতে পাহি মাং গদাৎ॥ **68.10**॥

॥ ইতি শ্রীমন্নারাযণীযে অষ্টষষ্টিতমং দশকং সমাপ্তম্॥